पाठ-17

# राष्ट्रस्तुतिः

अखण्डं राष्ट्रदेवं स्वं, नमामो भारतं दिव्यम्।
नगेन्द्रः सैनिको भूत्वा, बलिष्ठो विस्तृताकारः।
अरिभ्यो दुष्टवायुभ्यः, स्वदेशं त्रायते नित्यम्॥ अखण्डं........
त्रिवृत्तः सागरः शिष्टो, विनीतः सेवको भूत्वा।
पदप्रक्षालनं कुर्वन्, विधत्ते वन्दनं पुष्पम्॥ अखण्डं........
वहन्त्यः स्नेहजलधाराः, सुनद्यः मातृका भूत्वा।
स्वपुत्रान् पालयन्त्यस्ताः ददत्यः श्यामलं शम्यम्। अखण्डं........
समधिकः स्वर्गतो रम्यः, स्वभारतवर्ष-भूभागः।
निवासं कर्त्तुमिच्छन्तः, सुदेवाः सन्ति यत्रत्यम्॥ अखण्डं........
प्रथमतो ज्ञानदीपो यैः, प्रज्वलितो भारतीयास्ते।
जगद्गुरवो हि संपूज्या, तदनु शिक्षितमहो विश्वम्॥ अखण्डं........
किमधिकं भाषणं कुर्मः, स्वदेश! त्वत्कृते नूनम्।
महत्पुण्येन हि लब्धं, स्वजन्म भारते धन्यम्॥ अखण्डं........
अतः प्राणार्पणं कृत्वा, तथा सर्वस्वमपि हित्वा।
सुरक्ष्यं भारतं श्रेष्ठं, स्वराष्ट्रं दैवतं नित्यम्॥ अखण्डं........

## अभ्यासः

1. हिमालयः कस्मात् कस्मात् स्वदेशं त्रायते?
2. भारतमातुः पादप्रक्षालनं कः करोति?

★★★